# आत्मगुणविकासनम्

*विद्यार्थिन: अध्ययनेन साकम् आत्मन: गुणानां विकाशं कुर्यु: । अन्यथा उत्तरकाले ते सुनागरिका: न भवेयु: । एतदर्थं डॉ. निरञ्जनदाशेन विरचितोऽयं विषय: पुस्तकेऽस्मिन् सन्निवेशित: । कथ्यते "गुणा: सर्वत्र पूज्यन्ते पितृवंश: निरर्थक:" इति ।*

एकदा सर्वेऽपि प्राणिन: अन्ये जीवविशेषाश्च सृष्टिकर्त्तु: ब्रह्मण: समीपं गत्वा तम् उक्तवन्त: - "भो: पितामह ! अस्माकम् अभियोगं शृणोतु भवान्" इति ।

ब्रह्मा उक्तवान् - "भवन्त: एकैकश: आगत्य निवेदयन्तु" इति ।

आदौ गर्दभ: उक्तवान् - "हे प्रभो ! भवत: सृष्टौ पक्षपात: दृश्यते । यत: अत्र जीवानां मध्ये खाद्यखादकभाव: अस्ति । अन्यच्च तेषु केचन बुद्धिमन्त:, अन्ये केचन मन्दा: इति जना: मन्यन्ते । शृगाल: बुद्धिमान् इति प्रथा अस्ति । जना: मां बुद्धिहीनं मन्यन्ते । ते भारवहनकार्ये मां नियोजयन्ति । भवान् मां चतुरं करोतु । मम गुणान् शृगालाय ददातु" इति ।

तत: काक: उक्तवान् - "अहं जनानां सेवां करोमि । 'का का' कृत्वा रात्रि: समाप्ता इति जनान् प्रबोधयामि । परं मया उपकृता: अपि जना: मद्विषये जुगुप्सन्ते, कोकिलमेव प्रशंसन्ति च । कोकिलस्य सुमधुर: स्वर: मम तु कर्कश: । अत: भवान् मम कण्ठं मधुरं, कोकिलस्य च कर्कशं करोतु" इति ।

कुक्कुर: उक्तवान् - "प्रभो ! मां निकृष्टजीविनं मन्यन्ते जना: । उच्छिष्ट-अमेध्य-भक्षणेन माम् अस्पृश्यम् अपि मन्यन्ते ते । परम् उच्छिष्टं खादन् अपि मार्जार: तै: न तिरस्क्रियते । अत: मां मार्जारं करोतु" इति ।

तत: मण्डूक: अवदत् - "भगवन् ! सर्वे प्राणिन: ममोपरि निर्दयम् अत्याचारं कुर्वन्ति । सर्प: विनायासं मां खादति । तत: पलायितुमपि मह्यं शक्ति: न दत्ता भवता । विज्ञानच्छात्रा: अपि मां छिन्दन्ति । अत: मां बृहत्कायं करोतु" इति ।

तत्पश्चात् विषवृक्ष: अवदत् - "मम सर्वावयवे विषं भवति । अत: मां जातमात्रं दृष्ट्वा जना: समूलम् उत्पाटयन्ति । तुलसीं तु सर्वे पूजयन्ति । अत: मा तुलसीं करोतु" इति ।

एवं सर्वेऽपि परगुणानां प्रशंसा कुर्वन्त: स्वगुणविषये अतृप्तिम् असहिष्णुतां च प्राकटयन् । तत् श्रुत्वा ब्रह्मा उक्तवान्- भवताम् अपेक्षां पूरयितुमहम् असमर्थ: । सर्वे विष्णो: समीपं गच्छाम" इति ।

तत: सर्वेऽपि भगवत: विष्णो: समीपं गतवन्त:; स्वकीयम् अभियोगं श्रावितवन्तश्च । सकलं वृत्तान्तं

श्रुत्वा भगवान् विष्णुः उक्तवान् - ''प्रकृतेः नियमानुसारमेव भवन्तः सर्वे सृष्टाः । तदनुसारमेव तिष्ठन्तु'' इति ।

सर्वे एकस्वरेण अवदन् - ''यदि वयं यथा इच्छामः तथा परिवर्तनं न करिष्यति तर्हि भूलोकं न गमिष्यामः एव'' इति ।

एतत् औद्धत्यपूर्णं वचनं श्रुत्वा विष्णुः- ''अस्तु, भवन्तः यथा इच्छन्ति तथा करिष्यामि । इदानीं गच्छन्तु'' इति उक्तवान् । सन्तुष्टाः ते सर्वे अपि भूलोकमागतवन्तः ।

ततः भूलोकवासिनः अनुभूतवन्तः यत् काकाः कोकिलाः इव गायन्ति । गर्दभाः शृगालाः इव शब्दायन्ते कुक्कुरेषु मार्जारगुणाः दृश्यन्ते । बृहत्कायान् मण्डूकान् दृष्ट्वा सर्पाः भीत्या पलायन्ते । तुलसीं यः स्पृशति सः कण्डूतिम् अनुभवति । निम्बवृक्षाश्च मधुरायिताः ।

ईदृशं व्यतिक्रमं दृष्ट्वा भूलोकवासिनः विस्मिताः भीताश्च अभवन् । परिवर्तनं सोढुं ते न सज्जाः । ते चिन्तितवन्तः यत् प्रलयकालः एव सन्निहितः इति । ते भगवन्तं प्रार्थितवन्तः – ''भगवन् ! एतस्याः विपदः अस्मान् रक्षतु'' इति । अन्यगुणान् प्रदर्शयतः प्राणिनः वृक्षान् सस्यानि च ते सर्वथा तिरस्कृतवन्तः एव ।

एवं लोकानाम् अनादरपात्रतां गताः विफलमनोरथाः ते सर्वे पुनः विष्णोः समीपं गत्वा निवेदितवन्तः- ''हे भगवन् ! अस्माकमपराधं क्षाम्यतु । अस्मभ्यं पूर्वगुणान् एव ददातु । वयं सृष्टेः नियमं पालयन्तः यथापूर्वं जीवामः'' इति ।

एतत् श्रुत्वा दयालुः विष्णुः उक्तवान्- ''समतारक्षणं सृष्टेः धर्मः । गुणकर्मानुसारमेव भवन्तः सर्वे सृष्टाः । अधुना भूलोकं गच्छन्तु । स्वगुणैः बलीयांसः सन्तः सृष्टिप्रक्रियायां साहाय्यम् आचरन्तु'' इति ।

सर्वेऽपि सन्तुष्टाः सन्तः भूलोकमागताः । सृष्टिप्रक्रियायाम् आत्मानं योजितवन्तश्च ।

## टिप्पणी

एकदा - ଥରେ (एकस्मिन् समये) । उक्तवन्तः - କହିଲେ (अवदन्) । सृष्टौ - ସୃଷ୍ଟିରେ (सृष्टिमध्ये) । मन्दाः - ମୂର୍ଖମାନେ (मूर्खाः) । नियोजयन्ति - ନିୟୋଜିତ କରନ୍ତି (नियोजनं कुर्वन्ति) । निर्दयम् - ନିର୍ଦ୍ଦୟ (निष्ठुरम्) । छिन्दन्ति - କାଟନ୍ତି (कर्त्तनं कुर्वन्ति) । स्वकीयम् - ନିଜର (निजस्वम्) । सकलम् - ସମସ୍ତ (अखिलम्) । अनुभूतवन्तः - ଅନୁଭବକଲେ (अनुभवम् अकुर्वन्) । विस्मिताः - ଆଶ୍ଚର୍ଯ୍ୟ ହେଲେ (चकिताः) । विपदः - ବିପଦରୁ (दुःखात्) । प्राणिनः - ପ୍ରାଣୀମାନେ (जीवाः) । निवेदयन्तु - ଜଣାନ୍ତୁ (निवेदनं कुर्वन्तु) । जीवानाम् - ଜୀବମାନଙ୍କର (प्राणिनाम्) । मन्यन्ते - ମନେ କରନ୍ତି (चिन्तयन्ति) । भगवन् - ମହାଶୟ (महाशय) । विनायासम् - ସହଜରେ (अक्लेशेन) । अवयवे - ଅଙ୍ଗରେ (अङ्गे) । श्रावितवन्तः - ଶୁଣାଇଲେ (अश्रावयन्) । भूलोकम् - ପୃଥିବୀକୁ (पृथिवीम्) । बृहत्कायाम्– ବିଶାଳକାୟ (विशालकायाम्) । सोढुम् - ସହିବାକୁ (सहनं कर्त्तुम्) । क्षाम्यतु - କ୍ଷମା କରନ୍ତୁ (क्षमां करोतु) ।

## अभ्यासः

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

   (क) सर्वे प्राणिनः ब्रह्मणः समीपं गत्वा किमुक्तवन्तः ?

   (ख) गर्दभः ब्रह्माणं किमुक्तवान् ?

   (ग) काकेन ब्रह्मा किमुक्तः ?

   (घ) कुक्कुरः ब्रह्मणे केन प्रकारेण स्वदुःखं निवेदितवान् ?

   (ङ) विषवृक्षः किमवदत् ?

2. **निजभाषया एकपदात्मकं अतीव संक्षेपेण वा उत्तरं लिखत ।**

   (क) सृष्टेः धर्मः कः ?

   (ख) किं दृष्ट्वा भूलोकवासिनः विस्मिताः अभवन् ?

   (ग) के मधुरायिताः ?

   (घ) कां दृष्ट्वा सर्पाः भीत्या पलायन्ते ?

   (ङ) गर्दभाः कीदृशं शब्दायन्ते स्म ?

   (च) सर्वे प्राणिनः कस्य समीपं गतवन्तः ?

   (छ) कां सर्वे पूजयन्ति ?

   (ज) विषवृक्षस्य कुत्र विषं भवति ?

   (झ) सर्पः विनायासं कं खादति ?

   (ञ) जनाः कम् अस्पृश्यं मन्यन्ते ?

3. **सन्धिविच्छेदं कुरुत ।**

   सर्वेऽपि, अस्माकमपराधम्, भीताश्च, निम्बवृक्षाश्च, भूलोकमागतवन्तः, सर्वावयवे, पूरयितुमहम्, नियमानुसारमेव ।

4. **सन्धिं कुरुत ।**

   एक + एकशः, अन्यत् + च, मत् + विषये, कोकिलम् + एव, मम + उपरि, तत् + पश्चात्, तत् + अनुसारम् + एव, श्रावितवन्तः + च ।

**5. रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) अस्माकम् अभियोगं शृणोतु ।

(ख) भो प्रभो, भवतः सृष्टौ पक्षपातः दृश्यते ।

(ग) जनाः मां बुद्धिहीनं मन्यन्ते ।

(घ) कोकिलस्य सुमधुरः स्वरः ।

(ङ) मां मार्जारं करोतु ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) मह्यं शक्तिः न दत्ता ।

(ख) विषवृक्षः अवदत् ।

(ग) विष्णोः समीपं गच्छामः ।

(घ) भूलोकवासिनः विस्मिताः अभवन् ।

(ङ) समतारक्षणं सृष्टेः धर्मः ।

**7. वाक्यानि रचयत ।**

अपि, अधुना, उक्तवान्, श्रुत्वा, सोढुम्, अनुभवति, तथा, एतत्, एवम्, समीपम् ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) कः बुद्धिमान् इति प्रथा अस्ति ?

(i) शृगालः (ii) काकः

(iii) सिंहः (iv) मार्जारः

(ख) रात्रिः समाप्ता इति कः जनान् प्रबोधयति ?

(i) कपोतः (ii) काकः

(iii) चटकः (iv) खंजनः

(ग) सर्पः विनायासं कं खादति ?

(i) मार्जारम् (ii) मण्डूकम्

(iii) नकुलम् (iv) शशकम्

(घ) कस्य सर्वावयवे विषं भवति ?

(i) विषवृक्षस्य (ii) सर्पस्य

(iii) दुर्जनस्य (iv) गजस्य

(ङ) सृष्टेः धर्मः कः ?

(i) भिन्नतारक्षणम् (ii) ममतारक्षणम्

(iii) समतारक्षणम् (iv) प्रभाप्रदर्शनम्

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) सर्वेऽपि ____________ सन्तः भूलोकमागताः ।

(ख) भवन्तः यथा इच्छन्ति ____________ करिष्यामि ।

(ग) सर्वे ____________ समीपं गतवन्तः ।

(घ) मह्यं ____________ न दत्ता भवता ।

(ङ) भवान् मम ____________ मधुरं करोतु ।

| |
|---|
| विष्णोः कण्ठं, सन्तुष्टाः, शक्तिः, तथा |

●●●